५३९७ प्रियाष्टन् नकारान्तः, पुंलिङ्गः, अन्नन्तः (प्रियाः अष्टौ यस्य सः) हलन्तः
५३९८ प्रीणन अकारान्तः, नपुंसकलिङ्गः (प्रीणनम्) अजन्तः

५३९९ प्रीति इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (आनन्दः) अजन्तः
५४०० प्रेक्षा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (बुद्धिः, नृत्येक्षणम्) अजन्तः
५४०१ प्रेङ्खा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (दोला) अजन्तः
५४०२ प्रेत अकारान्तः, पुंलिङ्गः (नरकस्थप्राणी) अजन्तः
५४०३ प्रेमन् नकारान्तः, पुंलिङ्गः, अन्नन्तः (स्नेहः) हलन्तः
५४०४ प्रेमन् नकारान्तः, नपुंसकलिङ्गः, अन्नन्तः (स्नेहः) हलन्तः
५४०५ प्रेयस् सकारान्तः, पुंलिङ्गः, असन्तः, उगित् (अतिशयेन प्रियः) हलन्तः
५४०६ प्रेयङ्गवीण अकारान्तः, नपुंसकलिङ्गः (प्रियङ्गधान्योद्भवक्षेत्रम्) अजन्तः
५४०७ प्रैष अकारान्तः, पुंलिङ्गः (मर्दनम्, प्रेषणम्) अजन्तः
५४०८ प्रैष्य अकारान्तः, पुंलिङ्गः (दासः) अजन्तः
५४०९ प्रोक्षण अकारान्तः, नपुंसकलिङ्गः (यज्ञार्थं पशुहननम्) अजन्तः
५४१० प्रोथ अकारान्तः, पुंलिङ्गः (अश्वनासिका) अजन्तः
५४११ प्रोथ अकारान्तः, नपुंसकलिङ्गः (अश्वनासिका) अजन्तः
५४१२ प्रोष्ठपदा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (पूर्वभाद्रपदा-नक्षत्रम्) अजन्तः
५४१३ प्रोष्ठी ईकारान्तः, पुंलिङ्गः (प्रोष्ठीमत्स्यः) अजन्तः
५४१४ प्रोष्ठी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (प्रोष्ठीमत्स्यः) अजन्तः
५४१५ प्रौष्ठपद अकारान्तः, पुंलिङ्गः (भाद्रपदमासः) अजन्तः
५४१६ प्लक्ष अकारान्तः, पुंलिङ्गः (प्लक्षः, कपीतनवृक्षः) अजन्तः
५४१७ प्लव अकारान्तः, नपुंसकलिङ्गः (कैवर्तीमुस्तकम्) अजन्तः
५४१८ प्लव अकारान्तः, पुंलिङ्गः (तृणादिनिर्मिततरणसाधनम्, मण्डूकः, पक्षिजातिविशेषः, चण्डालः) अजन्तः
५४१९ प्लवग अकारान्तः, पुंलिङ्गः (वानरः) अजन्तः
५४२० प्लवङ्ग अकारान्तः, पुंलिङ्गः (वानरः) अजन्तः
५४२१ प्लवङ्गम अकारान्तः, पुंलिङ्गः (वानरः, मण्डूकः) अजन्तः
५४२२ प्लाक्ष अकारान्तः, नपुंसकलिङ्गः (प्लक्षस्य फलम्) अजन्तः
५४२३ प्लीहन् नकारान्तः, पुंलिङ्गः, अन्नन्तः (कुक्षिवामपार्श्वमांसपिण्डः) हलन्तः
५४२४ प्लीहशत्रु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (रोहितकवृक्षः) अजन्तः
५४२५ प्लुत अकारान्तः, नपुंसकलिङ्गः (अश्वगतिविशेषः) अजन्तः
५४२६ प्लोष अकारान्तः, पुंलिङ्गः (दाहः) अजन्तः
५४२७ फणधर अकारान्तः, पुंलिङ्गः (सर्पः) अजन्तः
५४२८ फणा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (फणः) अजन्तः
५४२९ फणिज्जक अकारान्तः, पुंलिङ्गः (जम्बीरः) अजन्तः
५४३० फणिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (सर्पः) हलन्तः
५४३१ फल अकारान्तः, नपुंसकलिङ्गः (वृक्षफलम्, वस्त्रयोनिः, फलकः, लाङ्गलस्याधस्थलोहकाष्ठम्, अधिकफलम्, सस्यहेतुकृतम्) अजन्तः
५४३२ फलक अकारान्तः, पुंलिङ्गः (फलकः) अजन्तः
५४३३ फलक अकारान्तः, नपुंसकलिङ्गः (फलकः) अजन्तः
५४३४ फलकपाणि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (फलकधारकः) अजन्तः
५४३५ फलत्रिक अकारान्तः, नपुंसकलिङ्गः (हरीतक्यामलकविभीतक्यां समाहारः) अजन्तः
५४३६ फलपूर अकारान्तः, पुंलिङ्गः (मातुलिङ्गकः) अजन्तः
५४३७ फलवत् तकारान्तः, पुंलिङ्गः, उगित्, अत्वन्तः (फलसहितवृक्षः) हलन्तः
५४३८ फलवत् तकारान्तः, नपुंसकलिङ्गः, उगित्, अत्वन्तः (फलसहितवृक्षः) हलन्तः
५४३९ फलाध्यक्ष अकारान्तः, पुंलिङ्गः (क्षीरिका) अजन्तः
५४४० फलिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (प्रियङ्गुवृक्षः, अग्निशिखा) अजन्तः
५४४१ फलिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (फलसहितवृक्षः) हलन्तः
५४४२ फलिन् नकारान्तः, नपुंसकलिङ्गः, इन्नन्तः (फलसहितवृक्षः) हलन्तः
५४४३ फली ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (प्रियङ्गुवृक्षः) अजन्तः
५४४४ फलेग्रहि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (यथाकालम् फलधरः) अजन्तः
५४४५ फलेग्रहि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (यथाकालम् फलधरः) अजन्तः
५४४६ फलेग्रहि इकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (यथाकालम् फलधरः) अजन्तः
५४४७ फलेरुहा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (पाटला) अजन्तः
५४४८ फल्गु उकारान्तः, नपुंसकलिङ्गः, घिसंज्ञकः (कदुम्बरी) अजन्तः
५४४९ फल्गु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (निःसारम्) अजन्तः
५४५० फल्गु उकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (निःसारम्) अजन्तः
५४५१ फाणित अकारान्तः, नपुंसकलिङ्गः (फाणितम्) अजन्तः
५४५२ फाल अकारान्तः, पुंलिङ्गः (लाङ्गलस्याधस्थलोहकाष्ठम्) अजन्तः
५४५३ फाल्गुन अकारान्तः, पुंलिङ्गः (फाल्गुनमासः) अजन्तः
५४५४ फाल्गुनिक अकारान्तः, पुंलिङ्गः (फाल्गुनमासः) अजन्तः
५४५५ फेन अकारान्तः, पुंलिङ्गः (समुद्रफेनः) अजन्तः
५४५६ फेनिल अकारान्तः, पुंलिङ्गः (अरिष्टः-रीढा, बदरीफलम्) अजन्तः

५४५७ फेरव अकारान्तः, पुंलिङ्गः (जम्भूकः) अजन्तः
५४५८ फेरु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (जम्भूकः) अजन्तः
५४५९ फेला आकारान्तः, स्त्रीलिङ्गः, आबन्तः (भुक्तोच्चिष्टम्) अजन्तः
५४६० बक अकारान्तः, पुंलिङ्गः (बकः) अजन्तः
५४६१ बकुल अकारान्तः, पुंलिङ्गः (बकुलः) अजन्तः
५४६२ बडिश अकारान्तः, नपुंसकलिङ्गः (मत्स्यवेधनम्) अजन्तः
५४६३ बदर अकारान्तः, नपुंसकलिङ्गः (बदरीफलम्) अजन्तः
५४६४ बदरा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (कार्पासी, वाराहीकन्दम्) अजन्तः
५४६५ बदरी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (बदरीवृक्षः) अजन्तः
५४६६ बधिर अकारान्तः, पुंलिङ्गः (श्रवणशक्तिहीनः) अजन्तः
५४६७ बन्धकी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (स्वैरिणी) अजन्तः
५४६८ बन्धन अकारान्तः, नपुंसकलिङ्गः (बन्धनम्) अजन्तः
५४६९ बन्धनालय अकारान्तः, पुंलिङ्गः (बन्धनगृहम्) अजन्तः
५४७० बन्धस्तम्भ अकारान्तः, पुंलिङ्गः (गजबन्धनस्तम्भः) अजन्तः
५४७१ बन्धु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (सगोत्रः) अजन्तः
५४७२ बन्धुजीवक अकारान्तः, पुंलिङ्गः (बन्धूकः) अजन्तः
५४७३ बन्धुता आकारान्तः, स्त्रीलिङ्गः, आबन्तः (बन्धूनां समूहः) अजन्तः
५४७४ बन्धुल अकारान्तः, पुंलिङ्गः (कुलटायाः पुत्रः) अजन्तः
५४७५ बन्धूक अकारान्तः, पुंलिङ्गः (बन्धूकः) अजन्तः
५४७६ बन्धूकपुष्प अकारान्तः, पुंलिङ्गः (जीवकः) अजन्तः
५४७७ बभूवस् सकारान्तः, पुंलिङ्गः, असन्तः, उगित् (यः अभवत् सः) हलन्तः
५४७८ बभ्रु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (विपुलनकुलः, विष्णुः, कपिलवर्णः) अजन्तः
५४७९ बभ्रु उकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (कपिलवर्णः) अजन्तः
५४८० बर्बर अकारान्तः, पुंलिङ्गः (भार्गी) अजन्तः
५४८१ बर्बरा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (खरपुष्पा) अजन्तः
५४८२ बर्ह अकारान्तः, पुंलिङ्गः (दलम्) अजन्तः
५४८३ बर्ह अकारान्तः, नपुंसकलिङ्गः (दलम्) अजन्तः
५४८४ बर्हपुष्प अकारान्तः, नपुंसकलिङ्गः (ग्रन्थिपर्णम्) अजन्तः
५४८५ बर्हि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (अग्निः) अजन्तः
५४८६ बर्हिण अकारान्तः, पुंलिङ्गः (मयूरः) अजन्तः
५४८७ बर्हिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (मयूरः) हलन्तः
५४८८ बर्हिर्मुख अकारान्तः, पुंलिङ्गः (देवः) अजन्तः
५४८९ बर्हिष्ठ अकारान्तः, नपुंसकलिङ्गः (ह्रीबेरम्) अजन्तः
५४९० बल अकारान्तः, नपुंसकलिङ्गः (सामर्थ्यम्, स्थौल्यम्) अजन्तः
५४९१ बल अकारान्तः, पुंलिङ्गः (बलभद्रः, सेना, काकः) अजन्तः
५४९२ बलदेव अकारान्तः, पुंलिङ्गः (बलभद्रः) अजन्तः
५४९३ बलभद्र अकारान्तः, पुंलिङ्गः (बलभद्रः) अजन्तः
५४९४ बलभद्रिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (त्रायमाणा) अजन्तः
५४९५ बलवत् तकारान्तः, पुंलिङ्गः, उगित्, अत्वन्तः (बलवान्) हलन्तः
५४९६ बलविन्यास अकारान्तः, पुंलिङ्गः (सैन्यव्यूहः) अजन्तः
५४९७ बलशालिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (बलवान) हलन्तः
५४९८ बला आकारान्तः, स्त्रीलिङ्गः, आबन्तः (कश्चन वृक्षभेदः) अजन्तः
५४९९ बलाका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (बकभेदः) अजन्तः
५५०० बलात्कार अकारान्तः, पुंलिङ्गः (बलात्कारः) अजन्तः
५५०१ बलाराति इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (इन्द्रः) अजन्तः
५५०२ बलाहक अकारान्तः, पुंलिङ्गः (विष्णोः अश्वः, मेघः) अजन्तः
५५०३ बलि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (भूतयज्ञः, बलिः, उपहारः) अजन्तः
५५०४ बलि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (प्राण्यङ्गजम्) अजन्तः
५५०५ बलिध्वंसिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (विष्णुः) हलन्तः
५५०६ बलिपुष्ट अकारान्तः, पुंलिङ्गः (काकः) अजन्तः
५५०७ बलिभुज् जकारान्तः, पुंलिङ्गः (काकः) हलन्तः
५५०८ बलिसद्मन् नकारान्तः, नपुंसकलिङ्गः, अन्नन्तः, संयोगपूर्वमनन्तः (पातालम्) हलन्तः
५५०९ बलीयस् सकारान्तः, पुंलिङ्गः, असन्तः, उगित् (अतिशयेन बलवान्) हलन्तः
५५१० बलीवर्द अकारान्तः, पुंलिङ्गः (वृषभः) अजन्तः
५५११ बल्लव अकारान्तः, पुंलिङ्गः (पाककर्ता) अजन्तः
५५१२ बल्वज अकारान्तः, पुंलिङ्गः, नित्यबहुवचनान्तः (बल्वजाः) अजन्तः
५५१३ बल्हीक अकारान्तः, नपुंसकलिङ्गः (हिङ्गुवृक्षनिर्यासः) अजन्तः
५५१४ बष्कयणी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (दीर्घकालेन प्रसूता गौः) अजन्तः
५५१५ बस्ति इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (नाभ्यधोभागः) अजन्तः

५५१६ बस्ति इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (नाभ्यधोभागः) अजन्तः
५५१७ बहिर्द्वार अकारान्तः, नपुंसकलिङ्गः (द्वारबाह्यभागम्) अजन्तः
५५१८ बहु उकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (बहुलम्) अजन्तः
५५१९ बहुगर्ह्यवाच् चकारान्तः, पुंलिङ्गः (बहुभाषी) हलन्तः
५५२० बहुगर्ह्यवाच् चकारान्तः, नपुंसकलिङ्गः (बहुभाषी) हलन्तः
५५२१ बहुपाद् दकारान्तः, पुंलिङ्गः (वटवृक्षः) हलन्तः
५५२२ बहुपूषन् नकारान्तः, नपुंसकलिङ्गः, अन्नन्तः (मन्वन्तरम्) हलन्तः
५५२३ बहुमूल्य अकारान्तः, नपुंसकलिङ्गः (बहुमूल्यवस्त्रम्) अजन्तः
५५२४ बहुरूप अकारान्तः, पुंलिङ्गः (रालः) अजन्तः
५५२५ बहुला आकारान्तः, स्त्रीलिङ्गः, आबन्तः (एला, कृत्तिका, गौः) अजन्तः
५५२६ बहुवारक अकारान्तः, पुंलिङ्गः (शेलुवृक्षः) अजन्तः
५५२७ बहुवृत्रहन् नकारान्तः, नपुंसकलिङ्गः, अन्नन्तः (ब्राह्मदिनम्) हलन्तः
५५२८ बहुश्रेयसी ईकारान्तः, पुंलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (अनेकपत्नीवान्) अजन्तः
५५२९ बहुसखि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (बह्वः सख्यः यस्य सः) अजन्तः
५५३० बहुसखि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (बहवः सखायः यस्य सः, ईषद् सखा) अजन्तः
५५३१ बहुसुता आकारान्तः, स्त्रीलिङ्गः, आबन्तः (शतावरी) अजन्तः
५५३२ बहुसूति इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (बहुप्रसूता गौः) अजन्तः
५५३३ बहूर्ज् जकारान्तः, नपुंसकलिङ्गः (बह्वी ऊर्जा यस्य तत् (कुलम्)) हलन्तः
५५३४ बह्वर्यमन् नकारान्तः, नपुंसकलिङ्गः, अन्नन्तः (मन्वन्तरम्) हलन्तः
५५३५ बाकुची ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (कश्चन वृक्षभेदः) अजन्तः
५५३६ बाढ अकारान्तः, नपुंसकलिङ्गः (अतिशयः, भृशप्रतिज्ञा) अजन्तः
५५३७ बाण अकारान्तः, पुंलिङ्गः (बाणः, बलिसुतः) अजन्तः
५५३८ बाणा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (नीलझिण्टिका) अजन्तः
५५३९ बाधा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (दुःखम्) अजन्तः
५५४० बान्धकिनेय अकारान्तः, पुंलिङ्गः (कुलटायाः पुत्रः) अजन्तः
५५४१ बान्धव अकारान्तः, पुंलिङ्गः (सगोत्रः) अजन्तः
५५४२ बार्हत अकारान्तः, नपुंसकलिङ्गः (बृहत्याः फलम्) अजन्तः
५५४३ बाल अकारान्तः, पुंलिङ्गः (बालः, केशः, अश्वबालः, मूर्खः, शिशुः) अजन्तः
५५४४ बाल अकारान्तः, नपुंसकलिङ्गः (ह्रीबेरम्) अजन्तः
५५४५ बालगर्भिणी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (प्रथमं गर्भं धृतवती गौः) अजन्तः
५५४६ बालतनय अकारान्तः, पुंलिङ्गः (खदिरः) अजन्तः
५५४७ बालतृण अकारान्तः, नपुंसकलिङ्गः (नूतनतृणम्) अजन्तः
५५४८ बालपाश्या आकारान्तः, स्त्रीलिङ्गः, आबन्तः (सीमन्तस्थितायाः स्वर्णादिपट्टिका) अजन्तः
५५४९ बालमूषिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (स्वल्पमूषकजातिः) अजन्तः
५५५० बाला आकारान्तः, स्त्रीलिङ्गः, आबन्तः (बालिका) अजन्तः
५५५१ बालिश अकारान्तः, पुंलिङ्गः (शिशुः) अजन्तः
५५५२ बालेयशाक अकारान्तः, पुंलिङ्गः (भार्गी) अजन्तः
५५५३ बाल्य अकारान्तः, नपुंसकलिङ्गः (बाल्यत्वम्) अजन्तः
५५५४ बाष्प अकारान्तः, पुंलिङ्गः (अश्रुः, उष्मा) अजन्तः
५५५५ बाष्पिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (हिङ्गुपत्रम्) अजन्तः
५५५६ बास्तेय अकारान्तः, पुंलिङ्गः (बस्तेः गोत्रापत्यम्) अजन्तः
५५५७ बाहु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (भुजः) अजन्तः
५५५८ बाहु उकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (भुजः) अजन्तः
५५५९ बाहुज अकारान्तः, पुंलिङ्गः (क्षत्रियः) अजन्तः
५५६० बाहुदा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (कार्तवीर्यावतारित नदी) अजन्तः
५५६१ बाहुमूल अकारान्तः, नपुंसकलिङ्गः (कक्षः) अजन्तः
५५६२ बाहुयुद्ध अकारान्तः, नपुंसकलिङ्गः (बाहुयुद्धम्) अजन्तः
५५६३ बाहुल अकारान्तः, पुंलिङ्गः (कार्तिकमासः) अजन्तः
५५६४ बाहुलेय अकारान्तः, पुंलिङ्गः (कार्तिकेयः) अजन्तः
५५६५ बाह्लिक अकारान्तः, पुंलिङ्गः (बाल्हिकदेशवाजिः) अजन्तः
५५६६ बाह्लीक अकारान्तः, नपुंसकलिङ्गः (कुङ्कुमम्, हिङ्गुवृक्षनिर्यासः) अजन्तः
५५६७ बिड अकारान्तः, नपुंसकलिङ्गः (कृतकलवणम्) अजन्तः
५५६८ बिडाल अकारान्तः, पुंलिङ्गः (मार्जारः) अजन्तः
५५६९ बिडौजस् सकारान्तः, पुंलिङ्गः, असन्तः (इन्द्रः) हलन्तः
५५७० बिन्दु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (जलकणः) अजन्तः
५५७१ बिन्दुजालक अकारान्तः, नपुंसकलिङ्गः (गजमुखादिस्थबिन्दुसमूहः) अजन्तः
५५७२ बिब्बोक अकारान्तः, पुंलिङ्गः (स्त्रीणाम् श्रृङ्गारभावजाः क्रिया) अजन्तः
५५७३ बिम्ब अकारान्तः, पुंलिङ्गः (रविचन्द्रबिम्बम्) अजन्तः
५५७४ बिम्ब अकारान्तः, नपुंसकलिङ्गः (रविचन्द्रबिम्बम्) अजन्तः

५५७५ बिम्बिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (तुण्डिकेरी) अजन्तः
५५७६ बिल अकारान्तः, नपुंसकलिङ्गः (बिलम्, गिरिबिलम्) अजन्तः
५५७७ बिलेशय अकारान्तः, पुंलिङ्गः (सर्पः) अजन्तः
५५७८ बिल्व अकारान्तः, पुंलिङ्गः (बिल्ववृक्षः) अजन्तः
५५७९ बिस अकारान्तः, नपुंसकलिङ्गः (अब्जादीनाम् मूलम्) अजन्तः
५५८० बिसकण्ठिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (बकभेदः) अजन्तः
५५८१ बिसप्रसून अकारान्तः, नपुंसकलिङ्गः (पद्मम्) अजन्तः
५५८२ बिसिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (पद्मसङ्घातः) अजन्तः
५५८३ बीज अकारान्तः, नपुंसकलिङ्गः (कारणम्, रेतस्) अजन्तः
५५८४ बीजकोश अकारान्तः, पुंलिङ्गः (पद्मबीजः) अजन्तः
५५८५ बीजपूर अकारान्तः, पुंलिङ्गः (मातुलिङ्गकः) अजन्तः
५५८६ बीजाकृत अकारान्तः, नपुंसकलिङ्गः (बीजवापोत्तरं कृष्टक्षेत्रम्) अजन्तः
५५८७ बीज्य अकारान्तः, पुंलिङ्गः (कुलोत्पन्नः) अजन्तः
५५८८ बीभत्स अकारान्तः, पुंलिङ्गः (नवरसेष्वेकः, बीभत्सरसः) अजन्तः
५५८९ बुक अकारान्तः, पुंलिङ्गः (बकपुष्पम्) अजन्तः
५५९० बुक्का आकारान्तः, स्त्रीलिङ्गः, आबन्तः (हृदयान्तर्गतमांसम्) अजन्तः
५५९१ बुद्ध अकारान्तः, पुंलिङ्गः (बुद्धः) अजन्तः
५५९२ बुद्धि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (बुद्धिः) अजन्तः
५५९३ बुद्धिमत् तकारान्तः, पुंलिङ्गः, उगित्, अत्वन्तः (बुद्धिमान्) हलन्तः
५५९४ बुद्धिशालिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (बुद्धिमान) हलन्तः
५५९५ बुध अकारान्तः, पुंलिङ्गः (उत्तरदिशायाः ग्रहः, बुधः, विद्वान्) अजन्तः
५५९६ बुध् धकारान्तः, पुंलिङ्गः (बोद्धा, पण्डितः) हलन्तः
५५९७ बुध्न अकारान्तः, पुंलिङ्गः (मूलमात्रम्) अजन्तः
५५९८ बुभुक्षा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (क्षुधा, क्षुत्, भोक्तुम् इच्छा) अजन्तः
५५९९ बुस अकारान्तः, नपुंसकलिङ्गः (पलालादिक्षोदः) अजन्तः
५६०० बृहतिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (उपरिवस्त्रम्) अजन्तः
५६०१ बृहती ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (कण्टकारिका, बृहतीच्छन्दः, महती) अजन्तः
५६०२ बृहत् तकारान्तः, नपुंसकलिङ्गः, उगित् (विस्तृतम्) हलन्तः
५६०३ बृहत् तकारान्तः, पुंलिङ्गः, उगित् (विस्तृतम्) हलन्तः
५६०४ बृहत्कुक्षि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (स्थूलोदरः) अजन्तः
५६०५ बृहद्भानु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (अग्निः) अजन्तः
५६०६ बृहस्पति इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (ईशानदिशायाः ग्रहः, बृहस्पतिः) अजन्तः
५६०७ बृंहित अकारान्तः, नपुंसकलिङ्गः (हस्तिगर्जनम्) अजन्तः
५६०८ बेभिद् दकारान्तः, नपुंसकलिङ्गः (पुनः पुनः भिनत्ति तद्) हलन्तः
५६०९ बोधकर अकारान्तः, पुंलिङ्गः (प्रातर्जागरणकारिः) अजन्तः
५६१० बोधिद्रुम अकारान्तः, पुंलिङ्गः (पिप्पलवृक्षः) अजन्तः
५६११ बोल अकारान्तः, पुंलिङ्गः (गन्धरसः) अजन्तः
५६१२ ब्रध्न अकारान्तः, पुंलिङ्गः (सूर्यः) अजन्तः
५६१३ ब्रम्ही ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (कश्चन वृक्षविशेषः, सोमवल्लरी) अजन्तः
५६१४ ब्रह्मचारिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (ब्रह्मचर्याश्रमी, ब्रह्मचारिः) हलन्तः
५६१५ ब्रह्मण्य अकारान्तः, पुंलिङ्गः (पार्श्वपिप्पलः) अजन्तः
५६१६ ब्रह्मत्व अकारान्तः, नपुंसकलिङ्गः (ब्रह्मभावः) अजन्तः
५६१७ ब्रह्मदर्भा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (अजमोदा) अजन्तः
५६१८ ब्रह्मदारु उकारान्तः, नपुंसकलिङ्गः, घिसंज्ञकः (पार्श्वपिप्पलः) अजन्तः
५६१९ ब्रह्मन् नकारान्तः, पुंलिङ्गः, अन्नन्तः, संयोगपूर्वमनन्तः (ब्रह्मदेवः, ब्रह्मा) हलन्तः
५६२० ब्रह्मन् नकारान्तः, नपुंसकलिङ्गः, अन्नन्तः, संयोगपूर्वमनन्तः (ब्राह्मणः, प्रजापतिः, वेदतत्त्वम्, तपः) हलन्तः
५६२१ ब्रह्मपुत्र अकारान्तः, पुंलिङ्गः (स्थावरविषभेदाः) अजन्तः
५६२२ ब्रह्मबन्धु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (ब्राह्मणाधिक्षेपः, ब्राह्मणनिर्देशः) अजन्तः
५६२३ ब्रह्मबन्धु उकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (ब्राह्मणाधिक्षेपः, ब्राह्मणनिर्देशः) अजन्तः
५६२४ ब्रह्मबिन्दु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (मुखनिर्गतबिन्धुः) अजन्तः
५६२५ ब्रह्मभूय अकारान्तः, नपुंसकलिङ्गः (ब्रह्मभावः) अजन्तः
५६२६ ब्रह्मवर्चस अकारान्तः, नपुंसकलिङ्गः (ब्रह्मवर्चसम्) अजन्तः
५६२७ ब्रह्मवादिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (वेदान्तशास्त्रज्ञः) हलन्तः
५६२८ ब्रह्मसायुज्य अकारान्तः, नपुंसकलिङ्गः (ब्रह्मभावः) अजन्तः
५६२९ ब्रह्मसू ऊकारान्तः, पुंलिङ्गः (कामदेवः) अजन्तः
५६३० ब्रह्माञ्जलि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (वेदपाठकाले कृताञ्जलिः) अजन्तः
५६३१ ब्रह्मासन अकारान्तः, नपुंसकलिङ्गः (ध्यानयोगासनम्) अजन्तः
५६३२ ब्राह्म अकारान्तः, नपुंसकलिङ्गः (ब्राह्मतीर्थम्) अजन्तः
५६३३ ब्राह्म अकारान्तः, पुंलिङ्गः (दैवयुगसहस्रद्वयम्) अजन्तः

५६३४ ब्राह्मण अकारान्तः, पुंलिङ्गः (ब्राह्मणः) अजन्तः
५६३५ ब्राह्मणयष्टिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (भार्गी) अजन्तः
५६३६ ब्राह्मणी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (भार्गी) अजन्तः
५६३७ ब्राह्मण्य अकारान्तः, नपुंसकलिङ्गः (ब्राह्मणानां समूहः) अजन्तः
५६३८ ब्राह्मी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (शक्तिदेवता, सरस्वती) अजन्तः
५६३९ ब्रुवत् तकारान्तः, पुंलिङ्गः, उगित् (ब्रूते सः) हलन्तः
५६४० भ अकारान्तः, नपुंसकलिङ्गः (नक्षत्रम्) अजन्तः
५६४१ भक्त अकारान्तः, नपुंसकलिङ्गः (सिद्धान्नम्) अजन्तः
५६४२ भक्ति इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (भजनम्, सेवा, विभागः) अजन्तः
५६४३ भग अकारान्तः, नपुंसकलिङ्गः (स्त्रीयोनिः, कीर्तिः, माहात्म्यम्, स्पृहा, वीर्यम्, धनसमृद्धिः, यत्नः) अजन्तः
५६४४ भग अकारान्तः, पुंलिङ्गः (सूर्यः) अजन्तः
५६४५ भगन्दर अकारान्तः, पुंलिङ्गः (भगन्दररोगः) अजन्तः
५६४६ भगवत् तकारान्तः, पुंलिङ्गः, उगित्, अत्वन्तः (बुद्धः) हलन्तः
५६४७ भगिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (स्वसा) अजन्तः
५६४८ भङ्ग अकारान्तः, पुंलिङ्गः (तरङ्गः, पराजयः) अजन्तः
५६४९ भङ्गा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (चणभेदः) अजन्तः
५६५० भङ्ग्य अकारान्तः, नपुंसकलिङ्गः (भङ्गाधान्यक्षेत्रम्) अजन्तः
५६५१ भट अकारान्तः, पुंलिङ्गः (योद्धा) अजन्तः
५६५२ भट्टारक अकारान्तः, पुंलिङ्गः (नाट्योक्तराजा) अजन्तः
५६५३ भट्टिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (राज्ञी) अजन्तः
५६५४ भण्डाकी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (कश्चन वृक्षविशेषः) अजन्तः
५६५५ भण्डिल अकारान्तः, पुंलिङ्गः (शिरीषः) अजन्तः
५६५६ भण्डी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (मञ्जिष्ठा) अजन्तः
५६५७ भण्डीरी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (मञ्जिष्ठा) अजन्तः
५६५८ भद्र अकारान्तः, नपुंसकलिङ्गः (शुभम्) अजन्तः
५६५९ भद्र अकारान्तः, पुंलिङ्गः (वृषभः) अजन्तः
५६६० भद्रकुम्भ अकारान्तः, पुंलिङ्गः (पूर्णघटम्) अजन्तः
५६६१ भद्रदारु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (देवदारुवृक्षः) अजन्तः
५६६२ भद्रदारु उकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (देवदारुवृक्षः) अजन्तः
५६६३ भद्रपर्णी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (काश्मरीवृक्षः) अजन्तः
५६६४ भद्रबला आकारान्तः, स्त्रीलिङ्गः, आबन्तः (प्रसारिणी) अजन्तः
५६६५ भद्रमुस्तक अकारान्तः, पुंलिङ्गः (नागमुस्ता) अजन्तः
५६६६ भद्रयव अकारान्तः, नपुंसकलिङ्गः (कुटजबीजम्) अजन्तः
५६६७ भद्रश्री ईकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (चन्दनः) अजन्तः
५६६८ भद्राकरण अकारान्तः, नपुंसकलिङ्गः (मुण्डनम्) अजन्तः
५६६९ भद्रासन अकारान्तः, नपुंसकलिङ्गः (राजासनम्) अजन्तः
५६७० भय अकारान्तः, नपुंसकलिङ्गः (भयम्) अजन्तः
५६७१ भयानक अकारान्तः, पुंलिङ्गः (नवरसेष्वेकः) अजन्तः
५६७२ भर अकारान्तः, पुंलिङ्गः (अतिशयः) अजन्तः
५६७३ भरण अकारान्तः, नपुंसकलिङ्गः (वेतनम्) अजन्तः
५६७४ भरण्य अकारान्तः, नपुंसकलिङ्गः (वेतनम्) अजन्तः
५६७५ भरण्यभुज् जकारान्तः, पुंलिङ्गः (मूल्येन कर्मकरः) हलन्तः
५६७६ भरण्यभुज् जकारान्तः, नपुंसकलिङ्गः (मूल्येन कर्मकरः) हलन्तः
५६७७ भरत अकारान्तः, पुंलिङ्गः (नटः) अजन्तः
५६७८ भरद्वाज अकारान्तः, पुंलिङ्गः (भरद्वाजपक्षी) अजन्तः
५६७९ भर्ग अकारान्तः, पुंलिङ्गः (शिवः) अजन्तः
५६८० भर्तृ ऋकारान्तः, पुंलिङ्गः, तृजन्तः (पतिः, पोष्टा, धाता) अजन्तः
५६८१ भर्तृदारक अकारान्तः, पुंलिङ्गः (युवराजः) अजन्तः
५६८२ भर्तृदारिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (राजपुत्री) अजन्तः
५६८३ भर्त्सन अकारान्तः, नपुंसकलिङ्गः (भयदर्शकवाक्यम्) अजन्तः
५६८४ भर्मन् नकारान्तः, नपुंसकलिङ्गः, अन्नन्तः, संयोगपूर्वमनन्तः (सुवर्णम्, वेतनम्) हलन्तः
५६८५ भल्ल अकारान्तः, पुंलिङ्गः (भल्लूकः) अजन्तः
५६८६ भल्लातकी ईकारान्तः, पुंलिङ्गः (वीरवृक्षः, कश्चन वृक्षविशेषः) अजन्तः
५६८७ भल्लुक अकारान्तः, पुंलिङ्गः (भल्लूकः) अजन्तः
५६८८ भव अकारान्तः, पुंलिङ्गः (शिवः, जननम्) अजन्तः
५६८९ भवती ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (त्वम् (स्त्री)) अजन्तः
५६९० भवत् तकारान्तः, पुंलिङ्गः, उगित्, अत्वन्तः (त्वम्) हलन्तः
५६९१ भवत् तकारान्तः, पुंलिङ्गः, उगित् (यः भवति सः) हलन्तः
५६९२ भवन अकारान्तः, नपुंसकलिङ्गः (गृहम्) अजन्तः

५६९३ भवादृश् शकारान्तः, पुंलिङ्गः, क्विन्नन्तः (भवान् इव दृश्यते सः) हलन्तः
५६९४ भवानी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (पार्वती) अजन्तः
५६९५ भविक अकारान्तः, नपुंसकलिङ्गः (शुभम्) अजन्तः
५६९६ भवितृ ऋकारान्तः, पुंलिङ्गः, तृजन्तः (भवनशीलः) अजन्तः
५६९७ भवितृ ऋकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, तृजन्तः (भवनशीलः) अजन्तः
५६९८ भविष्णु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (भवनशीलः) अजन्तः
५६९९ भविष्णु उकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (भवनशीलः) अजन्तः
५७०० भव्य अकारान्तः, नपुंसकलिङ्गः (शुभम्) अजन्तः
५७०१ भषक अकारान्तः, पुंलिङ्गः (शुनकः) अजन्तः
५७०२ भसित अकारान्तः, नपुंसकलिङ्गः (भूतिः, रक्षा, भस्मन्) अजन्तः
५७०३ भस्त्रा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (अग्निज्वलनवस्तु) अजन्तः
५७०४ भस्मगन्धिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (हरेणुका) अजन्तः
५७०५ भस्मगर्भा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (शुक्लसारशिंशपा) अजन्तः
५७०६ भस्मन् नकारान्तः, नपुंसकलिङ्गः, अन्नन्तः, संयोगपूर्वमनन्तः (भूतिः, रक्षा) हलन्तः
५७०७ भा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (प्रभा) अजन्तः
५७०८ भाग अकारान्तः, पुंलिङ्गः (विभागः) अजन्तः
५७०९ भागधेय अकारान्तः, नपुंसकलिङ्गः (प्राक्तनशुभाशुभकर्मः) अजन्तः
५७१० भागधेय अकारान्तः, पुंलिङ्गः (बलिः) अजन्तः
५७११ भागिनेय अकारान्तः, पुंलिङ्गः (भगिनीसुताः) अजन्तः
५७१२ भागिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (भागः अस्य अस्ति सः) हलन्तः
५७१३ भागीरथी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (नदीविशेषः, जाह्नवी, गङ्गा) अजन्तः
५७१४ भाग्य अकारान्तः, नपुंसकलिङ्गः (प्राक्तनशुभाशुभकर्मः, पुण्यपापकर्मम्) अजन्तः
५७१५ भाजन अकारान्तः, नपुंसकलिङ्गः (पात्रम्) अजन्तः
५७१६ भाण्ड अकारान्तः, नपुंसकलिङ्गः (पात्रम्, अश्वभूषा, मूलवणिग्धनम्) अजन्तः
५७१७ भात् तकारान्तः, नपुंसकलिङ्गः (यद् भाति तत्) हलन्तः
५७१८ भाद्र अकारान्तः, पुंलिङ्गः (भाद्रपदमासः) अजन्तः
५७१९ भाद्रपद अकारान्तः, पुंलिङ्गः (भाद्रपदमासः) अजन्तः
५७२० भाद्रपदा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (उत्तरभाद्रपदा-नक्षत्रम्) अजन्तः
५७२१ भानु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (सूर्यः, किरणः) अजन्तः
५७२२ भानुज अकारान्तः, पुंलिङ्गः (पश्चिमदिशायाः ग्रहः) अजन्तः
५७२३ भामिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (कोपनस्त्री) अजन्तः
५७२४ भार अकारान्तः, पुंलिङ्गः (विंशतितुला) अजन्तः
५७२५ भारती ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (सरस्वती) अजन्तः
५७२६ भारद्वाजी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (वनकार्पासी) अजन्तः
५७२७ भारयष्टि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (शक्याधारलगुडः) अजन्तः
५७२८ भारवाह अकारान्तः, पुंलिङ्गः (भारवाहकः) अजन्तः
५७२९ भारिक अकारान्तः, पुंलिङ्गः (भारवाहकः) अजन्तः
५७३० भार्गव अकारान्तः, पुंलिङ्गः (भृगोः गोत्रापत्यम्, परशुरामः, शुक्राचार्यः) अजन्तः
५७३१ भार्गवी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (लक्ष्मी, दूर्वा) अजन्तः
५७३२ भार्गी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (कश्चन वृक्षविशेषः) अजन्तः
५७३३ भार्या आकारान्तः, स्त्रीलिङ्गः, आबन्तः (पत्नी) अजन्तः
५७३४ भार्यापति इकारान्तः, पुंलिङ्गः, नित्यद्विवचनान्तः, घिसंज्ञकः (दम्पती) अजन्तः
५७३५ भालूक अकारान्तः, पुंलिङ्गः (भल्लूकः) अजन्तः
५७३६ भाव अकारान्तः, पुंलिङ्गः (विद्वान्, सत्ता, स्वभावः, अभिप्रायः, चेष्टा, आत्मा, जननम्) अजन्तः
५७३७ भावना आकारान्तः, स्त्रीलिङ्गः, आबन्तः (वासना) अजन्तः
५७३८ भाविन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (भविष्यति सः) हलन्तः
५७३९ भावुक अकारान्तः, नपुंसकलिङ्गः (शुभम्) अजन्तः
५७४० भाषा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (सरस्वती) अजन्तः
५७४१ भाषित अकारान्तः, नपुंसकलिङ्गः (वचनम्) अजन्तः
५७४२ भास् सकारान्तः, स्त्रीलिङ्गः (प्रभा) हलन्तः
५७४३ भास्कर अकारान्तः, पुंलिङ्गः (सूर्यः) अजन्तः
५७४४ भास्वत् तकारान्तः, पुंलिङ्गः, उगित्, अत्वन्तः (सूर्यः) हलन्तः
५७४५ भिक्षा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (याचनम्, भृतिः, सेवा) अजन्तः
५७४६ भिक्षु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (संन्यासाश्रमी, संन्यासी) अजन्तः
५७४७ भित्त अकारान्तः, नपुंसकलिङ्गः (खण्डमात्रम्) अजन्तः
५७४८ भित्ति इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (भित्तिः) अजन्तः
५७४९ भिदुर अकारान्तः, नपुंसकलिङ्गः (इन्द्रस्य वज्रायुधम्) अजन्तः
५७५० भिद् दकारान्तः, स्त्रीलिङ्गः (द्विधाभावः) हलन्तः
५७५१ भिन्दिपाल अकारान्तः, पुंलिङ्गः (अश्मक्षेपसाधनम्) अजन्तः

५७५२ भिषज् जकारान्तः, पुंलिङ्गः (वैद्यः) हलन्तः
५७५३ भिस्सटा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (दग्धोदनः) अजन्तः
५७५४ भिस्सा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (सिद्धान्नम्) अजन्तः
५७५५ भी ईकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (भयम्) अजन्तः
५७५६ भीति इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (भयम्) अजन्तः
५७५७ भीम अकारान्तः, पुंलिङ्गः (शिवः) अजन्तः
५७५८ भीरु उकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (शतावरी, स्त्रीविशेषः) अजन्तः
५७५९ भीरु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (भयशाली) अजन्तः
५७६० भीरु उकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (भयशाली) अजन्तः
५७६१ भीरुपत्री ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (शतावरी) अजन्तः
५७६२ भीष्मसू ऊकारान्तः, स्त्रीलिङ्गः (गङ्गा) अजन्तः
५७६३ भुक्तसमुज्झित अकारान्तः, नपुंसकलिङ्गः (भुक्तोच्छिष्टम्) अजन्तः
५७६४ भुज अकारान्तः, पुंलिङ्गः (भुजः) अजन्तः
५७६५ भुजग अकारान्तः, पुंलिङ्गः (सर्पः) अजन्तः
५७६६ भुजङ्ग अकारान्तः, पुंलिङ्गः (सर्पः) अजन्तः
५७६७ भुजङ्गभुज् जकारान्तः, पुंलिङ्गः (मयूरः) हलन्तः
५७६८ भुजङ्गम अकारान्तः, पुंलिङ्गः (सर्पः) अजन्तः
५७६९ भुजङ्गाक्षी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (रास्ना) अजन्तः
५७७० भुजशिरस् सकारान्तः, नपुंसकलिङ्गः, असन्तः (भुजशिरः) हलन्तः
५७७१ भुजान्तर अकारान्तः, नपुंसकलिङ्गः (अङ्कः) अजन्तः
५७७२ भुजिष्य अकारान्तः, पुंलिङ्गः (दासः) अजन्तः
५७७३ भुवन अकारान्तः, नपुंसकलिङ्गः (जलम्, लोकः) अजन्तः
५७७४ भू ऊकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (पृथिवी, भूमिः) अजन्तः
५७७५ भूत अकारान्तः, नपुंसकलिङ्गः (देवयोनिः, आवृतम्, अतीतः, भूमिः, प्राणी, युक्तम्) अजन्तः
५७७६ भूतकेश अकारान्तः, पुंलिङ्गः (भूतकेशः) अजन्तः
५७७७ भूतधात्री ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (भूमिः) अजन्तः
५७७८ भूतवेशी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (श्वेतनिर्गुण्डी) अजन्तः
५७७९ भूतात्मन् नकारान्तः, पुंलिङ्गः, अन्नन्तः, संयोगपूर्वमनन्तः (धाता, देहः) हलन्तः
५७८० भूतावास अकारान्तः, पुंलिङ्गः (विभीतकी) अजन्तः
५७८१ भूति इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (अणुताद्यष्टविधप्रभावः, भस्मन्, धनसमृद्धिः) अजन्तः
५७८२ भूतिक अकारान्तः, नपुंसकलिङ्गः (चिरायता, कुम्भी, तृणविशेषः) अजन्तः
५७८३ भूतेश अकारान्तः, पुंलिङ्गः (शिवः) अजन्तः
५७८४ भूदार अकारान्तः, पुंलिङ्गः (वराहः) अजन्तः
५७८५ भूदेव अकारान्तः, पुंलिङ्गः (ब्राह्मणः) अजन्तः
५७८६ भूनिम्ब अकारान्तः, पुंलिङ्गः (चिरायता) अजन्तः
५७८७ भूप अकारान्तः, पुंलिङ्गः (राजा) अजन्तः
५७८८ भूपति इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (राजा) अजन्तः
५७८९ भूपदी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (मल्लिका) अजन्तः
५७९० भूभुज् जकारान्तः, पुंलिङ्गः (भूपालः, राजा) हलन्तः
५७९१ भूभृत् तकारान्तः, पुंलिङ्गः (पर्वतः, राजा) हलन्तः
५७९२ भूमन् नकारान्तः, पुंलिङ्गः, अन्नन्तः (अतिशयेन बहु, अत्यन्तम्) हलन्तः
५७९३ भूमि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (भूमिः) अजन्तः
५७९४ भूमिजम्बुका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (कश्चन वृक्षविशेषः) अजन्तः
५७९५ भूमिस्पृश् शकारान्तः, पुंलिङ्गः, क्विन्नन्तः (वैश्यः) हलन्तः
५७९६ भूयस् सकारान्तः, पुंलिङ्गः, असन्तः, उगित् (अतिशयेन बहु, प्रचुरम्) हलन्तः
५७९७ भूरि इकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (बहुलम्) अजन्तः
५७९८ भूरि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (सुवर्णम्) अजन्तः
५७९९ भूरि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (बहुलम्) अजन्तः
५८०० भूरिफेना आकारान्तः, स्त्रीलिङ्गः, आबन्तः (सप्तला) अजन्तः
५८०१ भूरिमाय अकारान्तः, पुंलिङ्गः (जम्भूकः) अजन्तः
५८०२ भूरुण्डी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (हस्तिकर्णाभपत्रः) अजन्तः
५८०३ भूर्ज अकारान्तः, पुंलिङ्गः (भूर्जवृक्षः) अजन्तः
५८०४ भूषा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (भूषणक्रिया) अजन्तः
५८०५ भूष्णु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (भवनशीलः) अजन्तः
५८०६ भूष्णु उकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (भवनशीलः) अजन्तः
५८०७ भूस्तृण अकारान्तः, नपुंसकलिङ्गः (तृणविशेषः) अजन्तः
५८०८ भृगु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (पर्वतात्पतनस्थानम्) अजन्तः
५८०९ भृङ्ग अकारान्तः, नपुंसकलिङ्गः (त्वक्पत्रम्) अजन्तः
५८१० भृङ्ग अकारान्तः, पुंलिङ्गः (भृङ्गः, भ्रमरः) अजन्तः

५८११ भृङ्गराज अकारान्तः, पुंलिङ्गः (भृङ्गराजः) अजन्तः
५८१२ भृङ्गार अकारान्तः, पुंलिङ्गः (सुवर्णजलपात्रम्) अजन्तः
५८१३ भृङ्गारी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (झिल्लिका) अजन्तः
५८१४ भृङ्गिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (नन्दिः) हलन्तः
५८१५ भृतक अकारान्तः, पुंलिङ्गः (वेतनोपजीविः) अजन्तः
५८१६ भृति इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (वेतनम्) अजन्तः
५८१७ भृतिभुज् जकारान्तः, पुंलिङ्गः (वेतनोपजीविः) हलन्तः
५८१८ भृत्य अकारान्तः, पुंलिङ्गः (दासः) अजन्तः
५८१९ भृत्या आकारान्तः, स्त्रीलिङ्गः, आबन्तः (वेतनम्) अजन्तः
५८२० भृश अकारान्तः, नपुंसकलिङ्गः (अतिशयः) अजन्तः
५८२१ भृष्टयव अकारान्तः, पुंलिङ्गः (भर्जितयवः) अजन्तः
५८२२ भृस्ज् जकारान्तः, पुंलिङ्गः (यः भृज्जति सः) हलन्तः
५८२३ भेक अकारान्तः, पुंलिङ्गः (मण्डूकः) अजन्तः
५८२४ भेकी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (मण्डूकी) अजन्तः
५८२५ भेद अकारान्तः, पुंलिङ्गः (उपायाः, भेदः) अजन्तः
५८२६ भेद्यगामिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (दुःखम्) हलन्तः
५८२७ भेरी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (दुन्दुभिः, आनकः, कश्चन वाद्यविशेषः) अजन्तः
५८२८ भेषज अकारान्तः, नपुंसकलिङ्गः (औषधम्) अजन्तः
५८२९ भैक्ष अकारान्तः, नपुंसकलिङ्गः (भिक्षाद्रव्यम्) अजन्तः
५८३० भैषज्य अकारान्तः, नपुंसकलिङ्गः (औषधम्) अजन्तः
५८३१ भोक्तृ ऋकारान्तः, पुंलिङ्गः, तृजन्तः (भोक्ता, उपभोक्ता) अजन्तः
५८३२ भोग अकारान्तः, पुंलिङ्गः (सर्पशरीरम्, आनन्दः, सर्पः, स्त्र्यादिभृतिः) अजन्तः
५८३३ भोगधर अकारान्तः, पुंलिङ्गः (सर्पः) अजन्तः
५८३४ भोगवती ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (नगरम्, नदी, नागाः) अजन्तः
५८३५ भोगिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (राजभार्या) अजन्तः
५८३६ भोगिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (सर्पः) हलन्तः
५८३७ भोजन अकारान्तः, नपुंसकलिङ्गः (भोजनम्) अजन्तः
५८३८ भौम अकारान्तः, पुंलिङ्गः (मङ्गलः) अजन्तः
५८३९ भौरिक अकारान्तः, पुंलिङ्गः (सुवर्णाधिकृतः) अजन्तः
५८४० भ्रकुटि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (क्रोधादिजनितभ्रूलता) अजन्तः
५८४१ भ्रकुस अकारान्तः, पुंलिङ्गः (स्त्रीवेषधारी पुरुषः) अजन्तः
५८४२ भ्रम अकारान्तः, पुंलिङ्गः (अतस्मित्तज्ज्ञानम्, जलनिस्सरणजालकम्, भ्रमणम्) अजन्तः
५८४३ भ्रमर अकारान्तः, पुंलिङ्गः (भ्रमरः) अजन्तः
५८४४ भ्रमरक अकारान्तः, पुंलिङ्गः (ललाडगतकेशाः) अजन्तः
५८४५ भ्रमि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (भ्रमणम्) अजन्तः
५८४६ भ्राजिष्णु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (अलङ्कारादिना शोभमानः) अजन्तः
५८४७ भ्राजिष्णु उकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (अलङ्कारादिना शोभमानः) अजन्तः
५८४८ भ्रातृ ऋकारान्तः, पुंलिङ्गः (भ्राता, बन्धुः, सहोदरः) अजन्तः
५८४९ भ्रातृज अकारान्तः, पुंलिङ्गः (भ्रातृपुत्रः) अजन्तः
५८५० भ्रातृजाया आकारान्तः, स्त्रीलिङ्गः, आबन्तः (भ्रातृपत्निः) अजन्तः
५८५१ भ्रातृभगिनी ईकारान्तः, स्त्रीलिङ्गः, नित्यद्विवचनान्तः, नदीसंज्ञकः, ङ्यन्तः (भ्रातृभगिन्योः नाम) अजन्तः
५८५२ भ्रातृव्य अकारान्तः, पुंलिङ्गः (भ्रातृपुत्रः, शत्रुः) अजन्तः
५८५३ भ्रात्रीय अकारान्तः, पुंलिङ्गः (भ्रातृपुत्रः) अजन्तः
५८५४ भ्रान्ति इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (अतस्मित्तज्ज्ञानम्) अजन्तः
५८५५ भ्राष्ट्र अकारान्तः, पुंलिङ्गः (भर्जनपात्रम्) अजन्तः
५८५६ भ्रुकुटि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (क्रोधादिजनितभ्रूलता) अजन्तः
५८५७ भ्रुकुस अकारान्तः, पुंलिङ्गः (स्त्रीवेषधारी पुरुषः) अजन्तः
५८५८ भ्रू ऊकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (नेत्रस्य उपरि भागे विद्यमानाः केशाः, नेत्रोपरिभागस्थरोमराजिः) अजन्तः
५८५९ भ्रूकुटि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (क्रोधादिजनितभ्रूलता) अजन्तः
५८६० भ्रूकुस अकारान्तः, पुंलिङ्गः (स्त्रीवेषधारी पुरुषः) अजन्तः
५८६१ भ्रूण अकारान्तः, पुंलिङ्गः (कुक्षिस्थगर्भः, शिशुः) अजन्तः
५८६२ भ्रेष अकारान्तः, पुंलिङ्गः (भ्रंशः) अजन्तः
५८६३ मकर अकारान्तः, पुंलिङ्गः (विशेषनिधिः, जलजन्तुविशेषः) अजन्तः
५८६४ मकरध्वज अकारान्तः, पुंलिङ्गः (कामदेवः) अजन्तः
५८६५ मकरन्द अकारान्तः, पुंलिङ्गः (पुष्पमधुः) अजन्तः
५८६६ मकुष्ठक अकारान्तः, पुंलिङ्गः (वनमुद्गः) अजन्तः
५८६७ मकूलक अकारान्तः, पुंलिङ्गः (वज्रदन्ती) अजन्तः
५८६८ मक्षिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (ववर्णा, नीला, कीटविशेषः) अजन्तः

५८६९ मख अकारान्तः, पुंलिङ्गः (यज्ञः) अजन्तः
५८७० मगध अकारान्तः, पुंलिङ्गः (वंशपरम्पराशंसकाः) अजन्तः
५८७१ मघवन् नकारान्तः, पुंलिङ्गः, अन्नन्तः (इन्द्रः) हलन्तः
५८७२ मङ्गल अकारान्तः, नपुंसकलिङ्गः (शुभम्) अजन्तः
५८७३ मङ्गल्यक अकारान्तः, पुंलिङ्गः (मसूरः) अजन्तः
५८७४ मचर्चिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (प्रशस्तम्) अजन्तः
५८७५ मज्जन् नकारान्तः, पुंलिङ्गः, अन्नन्तः (वृक्षकोमलत्वक्) हलन्तः
५८७६ मञ्च अकारान्तः, पुंलिङ्गः (पर्यङ्कः) अजन्तः
५८७७ मञ्जरि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (मञ्जरिः) अजन्तः
५८७८ मञ्जिष्ठा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (वृक्षविशेषः) अजन्तः
५८७९ मञ्जीर अकारान्तः, पुंलिङ्गः (नूपुरः) अजन्तः
५८८० मञ्जीर अकारान्तः, नपुंसकलिङ्गः (नूपुरः) अजन्तः
५८८१ मञ्जु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (मनोरमम्) अजन्तः
५८८२ मञ्जु उकारान्तः, नपुंसकलिङ्गः, भाषितपुंस्कः, घिसंज्ञकः (मनोरमम्) अजन्तः
५८८३ मञ्जुघोषा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (मञ्जुघोषानामाप्सरा) अजन्तः
५८८४ मञ्जूषा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (पेटकः) अजन्तः
५८८५ मठ अकारान्तः, पुंलिङ्गः (शिष्याणां निलयः) अजन्तः
५८८६ मडुडु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (वाद्यविशेषः) अजन्तः
५८८७ मणि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (रत्नम्) अजन्तः
५८८८ मणि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (रत्नम्) अजन्तः
५८८९ मणिक अकारान्तः, पुंलिङ्गः (महाकुम्भः) अजन्तः
५८९० मणित अकारान्तः, नपुंसकलिङ्गः (रतिसमयकूजितम्) अजन्तः
५८९१ मण्ड अकारान्तः, पुंलिङ्गः (एरण्डः, सर्वेषाम् रसानामग्रम्) अजन्तः
५८९२ मण्ड अकारान्तः, नपुंसकलिङ्गः (सर्वेषाम् रसानामग्रम्) अजन्तः
५८९३ मण्डन अकारान्तः, नपुंसकलिङ्गः (भूषणम्) अजन्तः
५८९४ मण्डप अकारान्तः, पुंलिङ्गः (मण्डपः) अजन्तः
५८९५ मण्डप अकारान्तः, नपुंसकलिङ्गः (मण्डपः) अजन्तः
५८९६ मण्डल अकारान्तः, नपुंसकलिङ्गः (चक्राकारदिशः नाम, चन्द्रसूर्ययोरुत्पातादिजातमण्डलः) अजन्तः
५८९७ मण्डलक अकारान्तः, नपुंसकलिङ्गः (मण्डलाकारकुष्ठः) अजन्तः
५८९८ मण्डलाग्र अकारान्तः, पुंलिङ्गः (खड्गः) अजन्तः
५८९९ मण्डलेश्वर अकारान्तः, पुंलिङ्गः (मण्डलेश्वरः) अजन्तः
५९०० मण्डहारक अकारान्तः, पुंलिङ्गः (शौण्डिकः) अजन्तः
५९०१ मण्डूक अकारान्तः, पुंलिङ्गः (मण्डूकः) अजन्तः
५९०२ मण्डूकपर्ण अकारान्तः, पुंलिङ्गः (शोणकः) अजन्तः
५९०३ मण्डूकपर्णी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (मञ्जिष्ठा) अजन्तः
५९०४ मण्डूर अकारान्तः, नपुंसकलिङ्गः (लोहमलम्) अजन्तः
५९०५ मतङ्गज अकारान्तः, पुंलिङ्गः (हस्तिः) अजन्तः
५९०६ मतल्लिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (प्रशस्तम्) अजन्तः
५९०७ मति इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (बुद्धिः) अजन्तः
५९०८ मत्त अकारान्तः, पुंलिङ्गः (मत्तगजः) अजन्तः
५९०९ मत्तकाशिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (अत्यन्तोत्कृष्टस्त्री) अजन्तः
५९१० मत्सर अकारान्तः, पुंलिङ्गः (अन्यशुभद्वेषः) अजन्तः
५९११ मत्स्य अकारान्तः, पुंलिङ्गः (मत्स्यः) अजन्तः
५९१२ मत्स्यन्डी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (फाणितम्) अजन्तः
५९१३ मत्स्यपित्ता आकारान्तः, स्त्रीलिङ्गः, आबन्तः (कटुरोहिणी) अजन्तः
५९१४ मत्स्यवेधन अकारान्तः, नपुंसकलिङ्गः (मत्स्यवेधनम्) अजन्तः
५९१५ मत्स्याक्षी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (ब्रम्ही) अजन्तः
५९१६ मत्स्याधानी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (मत्स्यस्थापनपात्रम्) अजन्तः
५९१७ मथिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (विलोडनदण्डः) हलन्तः
५९१८ मद अकारान्तः, पुंलिङ्गः (मदः, मदजलम्, आनन्दः) अजन्तः
५९१९ मदकल अकारान्तः, पुंलिङ्गः (अन्तर्मदहस्तिः) अजन्तः
५९२० मदन अकारान्तः, पुंलिङ्गः (कामदेवः, मयनफलवृक्षः, धत्तूरः) अजन्तः
५९२१ मदस्थान अकारान्तः, नपुंसकलिङ्गः (मद्यगृहम्) अजन्तः
५९२२ मदिरा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (सुरा) अजन्तः
५९२३ मदिरागृह अकारान्तः, नपुंसकलिङ्गः (मद्यसन्धानगृहम्) अजन्तः
५९२४ मदोत्कट अकारान्तः, पुंलिङ्गः (अन्तर्मदहस्तिः) अजन्तः
५९२५ मद्गु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (पक्षिजातिविशेषः) अजन्तः
५९२६ मद्गुर अकारान्तः, पुंलिङ्गः (मद्गुरमत्स्यः) अजन्तः
५९२७ मद्य अकारान्तः, नपुंसकलिङ्गः (सुरा) अजन्तः

५९२८ मधु उकारान्तः, नपुंसकलिङ्गः, घिसंज्ञकः (मधुकपुष्पकृतमद्यम्) अजन्तः
५९२९ मधु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (चैत्रमासः, पुष्पमधुः, सुरा) अजन्तः
५९३० मधुक अकारान्तः, नपुंसकलिङ्गः (यष्टिमधुकम्) अजन्तः
५९३१ मधुकर अकारान्तः, पुंलिङ्गः (भ्रमरः) अजन्तः
५९३२ मधुक्रम अकारान्तः, पुंलिङ्गः (मधुपानावसरः) अजन्तः
५९३३ मधुद्रुम अकारान्तः, पुंलिङ्गः (मधूकः) अजन्तः
५९३४ मधुप अकारान्तः, पुंलिङ्गः (भ्रमरः) अजन्तः
५९३५ मधुपर्णिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (काश्मरीवृक्षः, नीली) अजन्तः
५९३६ मधुपर्णी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (गुडूची) अजन्तः
५९३७ मधुपा आकारान्तः, पुंलिङ्गः (मधु पिबति सः, भ्रमरः) अजन्तः
५९३८ मधुमक्षिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (कीटकविशेषः) अजन्तः
५९३९ मधुयष्टिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (यष्टिमधुकम्) अजन्तः
५९४० मधुर अकारान्तः, पुंलिङ्गः (मधुररसः) अजन्तः
५९४१ मधुरक अकारान्तः, पुंलिङ्गः (जीवकः) अजन्तः
५९४२ मधुरसा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (मूर्वा, द्राक्षा) अजन्तः
५९४३ मधुरा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (शतपुष्पा) अजन्तः
५९४४ मधुरिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (कश्चन वृक्षविशेषः) अजन्तः
५९४५ मधुरिपु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (विष्णुः) अजन्तः
५९४६ मधुरिमन् नकारान्तः, पुंलिङ्गः, अन्नन्तः (माधुर्यम्, रोचकता) हलन्तः
५९४७ मधुलिह् हकारान्तः, पुंलिङ्गः (भ्रमरः) हलन्तः
५९४८ मधुवार अकारान्तः, पुंलिङ्गः (मधुपानावसरः) अजन्तः
५९४९ मधुव्रत अकारान्तः, पुंलिङ्गः (भ्रमरः) अजन्तः
५९५० मधुशिग्रु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (रक्तशिग्रुः) अजन्तः
५९५१ मधुश्रेणी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (मूर्वा) अजन्तः
५९५२ मधुष्ठील अकारान्तः, पुंलिङ्गः (मधूकः) अजन्तः
५९५३ मधुस्रवा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (जीवन्तिका) अजन्तः
५९५४ मधूक अकारान्तः, पुंलिङ्गः (मधूकः) अजन्तः
५९५५ मधूच्छिष्ट अकारान्तः, नपुंसकलिङ्गः (मधूच्छिष्टम्) अजन्तः
५९५६ मधूलक अकारान्तः, पुंलिङ्गः (जलजमधूकः) अजन्तः
५९५७ मधूलिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (मूर्वा) अजन्तः
५९५८ मध्य अकारान्तः, पुंलिङ्गः (देहमध्यः) अजन्तः
५९५९ मध्य अकारान्तः, नपुंसकलिङ्गः (देहमध्यः) अजन्तः
५९६० मध्यदेश अकारान्तः, पुंलिङ्गः (भारतभूमेः मध्यदेशः) अजन्तः
५९६१ मध्यम अकारान्तः, पुंलिङ्गः (मध्यमस्वरः, भारतभूमेः मध्यदेशः, देहमध्यः) अजन्तः
५९६२ मध्यम अकारान्तः, नपुंसकलिङ्गः (देहमध्यः) अजन्तः
५९६३ मध्यमा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (प्रथमप्राप्तरजोयोगा, मध्याङ्गुली) अजन्तः
५९६४ मध्याह्न अकारान्तः, पुंलिङ्गः (दिवसस्य मध्यः भागः) अजन्तः
५९६५ मध्वासव अकारान्तः, पुंलिङ्गः (मधुकपुष्पकृतमद्यम्) अजन्तः
५९६६ मनःशिला आकारान्तः, स्त्रीलिङ्गः, आबन्तः (रक्तवर्णधातुविशेषः) अजन्तः
५९६७ मनसिज अकारान्तः, पुंलिङ्गः (कामदेवः) अजन्तः
५९६८ मनस् सकारान्तः, नपुंसकलिङ्गः, असन्तः (चेतः, हृद्, मानसम्, चित्तम्) हलन्तः
५९६९ मनस्कार अकारान्तः, पुंलिङ्गः (मनसः सुखभोगे तत्परता) अजन्तः
५९७० मनस्विन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (प्रशस्तमनस्कः, प्रशस्तं मनः यस्य सः) हलन्तः
५९७१ मनीषा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (बुद्धिः) अजन्तः
५९७२ मनीषिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (विद्वान्) हलन्तः
५९७३ मनुज अकारान्तः, पुंलिङ्गः (मनुष्यः) अजन्तः
५९७४ मनुष्य अकारान्तः, पुंलिङ्गः (मनुष्यः) अजन्तः
५९७५ मनुष्यधर्मन् नकारान्तः, पुंलिङ्गः, अन्नन्तः, संयोगपूर्वमनन्तः (कुबेरः) हलन्तः
५९७६ मनोगुप्ता आकारान्तः, स्त्रीलिङ्गः, आबन्तः (मनःशिला) अजन्तः
५९७७ मनोरथ अकारान्तः, पुंलिङ्गः (स्पृहा) अजन्तः
५९७८ मनोहारिन् नकारान्तः, नपुंसकलिङ्गः, इन्नन्तः (मनोहारि, रुचिकरम्, स्पष्टवचनम्) हलन्तः
५९७९ मनोह्वा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (मनःशिला) अजन्तः
५९८० मन्तु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (अपराधः) अजन्तः
५९८१ मन्तृ ऋकारान्तः, पुंलिङ्गः, तृजन्तः (मन्ता, चिन्तकः) अजन्तः
५९८२ मन्त्र अकारान्तः, पुंलिङ्गः (वेदभेदः, गुप्तिवादः) अजन्तः
५९८३ मन्त्रजा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (राजशक्तिः) अजन्तः
५९८४ मन्त्रव्याख्याकृत् तकारान्तः, पुंलिङ्गः (मन्त्रव्याख्याकर्ता) हलन्तः
५९८५ मन्त्रिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (मन्त्री) हलन्तः
५९८६ मन्थ अकारान्तः, पुंलिङ्गः (मन्थनदण्डः, मृद्भाण्डम्, उष्ट्रिका) अजन्तः

५९८७ मन्थदण्डक अकारान्तः, पुंलिङ्गः (मन्थनदण्डः) अजन्तः
५९८८ मन्थनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (मन्थनपात्रम्) अजन्तः
५९८९ मन्थर अकारान्तः, पुंलिङ्गः (शनैर्गमनशीलः) अजन्तः
५९९० मन्थान अकारान्तः, पुंलिङ्गः (मन्थनदण्डः) अजन्तः
५९९१ मन्द अकारान्तः, पुंलिङ्गः (अलसः) अजन्तः
५९९२ मन्दगामिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (शनैर्गमनशीलः) हलन्तः
५९९३ मन्दधी ईकारान्तः, पुंलिङ्गः (मन्दा धीः यस्य सः) अजन्तः
५९९४ मन्दाकिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (देवगङ्गा) अजन्तः
५९९५ मन्दाक्ष अकारान्तः, नपुंसकलिङ्गः (लज्जा) अजन्तः
५९९६ मन्दार अकारान्तः, पुंलिङ्गः (देववृक्षः, निम्बतरुः-वकायिनी, अर्कः) अजन्तः
५९९७ मन्दिर अकारान्तः, नपुंसकलिङ्गः (गृहम्, नगरम्) अजन्तः
५९९८ मन्दुरा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (अश्वालयः) अजन्तः
५९९९ मन्दोष्ण अकारान्तः, नपुंसकलिङ्गः (ईषदुष्णम्) अजन्तः
६००० मन्द्र अकारान्तः, पुंलिङ्गः (गम्भीरध्वनिः) अजन्तः
६००१ मन्मथ अकारान्तः, पुंलिङ्गः (कामदेवः, कपित्थः) अजन्तः
६००२ मन्या आकारान्तः, स्त्रीलिङ्गः, आबन्तः (ग्रीवा) अजन्तः
६००३ मन्यु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (शोकः, कोपः, दैन्यम्, यज्ञः) अजन्तः
६००४ मन्वन्तर अकारान्तः, नपुंसकलिङ्गः (एकसप्तति देवयुगम्) अजन्तः
६००५ मय अकारान्तः, पुंलिङ्गः (उष्ट्रः) अजन्तः
६००६ मयु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (किन्नरः) अजन्तः
६००७ मयुष्टक अकारान्तः, पुंलिङ्गः (वनमुद्गः) अजन्तः
६००८ मयूख अकारान्तः, पुंलिङ्गः (किरणः, अग्निज्वाला) अजन्तः
६००९ मयूर अकारान्तः, पुंलिङ्गः (कारवी, मयूरः) अजन्तः
६०१० मयूरक अकारान्तः, नपुंसकलिङ्गः (तुत्थाञ्जनम्) अजन्तः
६०११ मयूरक अकारान्तः, पुंलिङ्गः (अपामार्गः) अजन्तः
६०१२ मरकत अकारान्तः, नपुंसकलिङ्गः (मरतकमणिः) अजन्तः
६०१३ मरण अकारान्तः, नपुंसकलिङ्गः (मरणम्) अजन्तः
६०१४ मरीच अकारान्तः, नपुंसकलिङ्गः (मरीचम्) अजन्तः
६०१५ मरीचि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (किरणः) अजन्तः
६०१६ मरीचि इकारान्तः, स्त्रीलिङ्गः, पाक्षिकनदीसंज्ञकः (किरणः) अजन्तः
६०१७ मरीचिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (मृगतृष्णा) अजन्तः
६०१८ मरीची ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (सप्तर्षिषु एकः) अजन्तः
६०१९ मरु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (निर्जलदेशः, पर्वतः) अजन्तः
६०२० मरुत् तकारान्तः, पुंलिङ्गः (वायुः, वायव्यदिशायाः स्वामी, वायुदेवः) हलन्तः
६०२१ मरुत्वत् तकारान्तः, पुंलिङ्गः, उगित्, अत्वन्तः (इन्द्रः) हलन्तः
६०२२ मरुन्माला आकारान्तः, स्त्रीलिङ्गः, आबन्तः (स्पृक्का) अजन्तः
६०२३ मरुबक अकारान्तः, पुंलिङ्गः (मयनफलवृक्षः, जम्बीरः) अजन्तः
६०२४ मर्कट अकारान्तः, पुंलिङ्गः (वानरः) अजन्तः
६०२५ मर्कटक अकारान्तः, पुंलिङ्गः (ऊर्णनाभः) अजन्तः
६०२६ मर्कटी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (करञ्जभेदः) अजन्तः
६०२७ मर्त्य अकारान्तः, पुंलिङ्गः (मनुष्यः) अजन्तः
६०२८ मर्दन अकारान्तः, नपुंसकलिङ्गः (पादमर्दनादिः) अजन्तः
६०२९ मर्दल अकारान्तः, पुंलिङ्गः (वाद्यविशेषः) अजन्तः
६०३० मर्मन् नकारान्तः, नपुंसकलिङ्गः, अन्नन्तः, संयोगपूर्वमनन्तः (जीवस्थानम्, सन्धिस्थानम्) हलन्तः
६०३१ मर्मर अकारान्तः, पुंलिङ्गः (वस्त्रपर्णध्वनिः) अजन्तः
६०३२ मर्मस्पृश् शकारान्तः, पुंलिङ्गः, क्विन्नन्तः (मर्मपीडकः) हलन्तः
६०३३ मर्मस्पृश् शकारान्तः, नपुंसकलिङ्गः, क्विन्नन्तः (मर्मपीडकः) हलन्तः
६०३४ मर्यादा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (सीमा, धारणा, संस्था, प्रमाणम्) अजन्तः
६०३५ मल अकारान्तः, पुंलिङ्गः (मलम्, पापम्, पुराणकिट्टम्) अजन्तः
६०३६ मल अकारान्तः, नपुंसकलिङ्गः (मलम्, पापम्, पुराणकिट्टम्) अजन्तः
६०३७ मलपू ऊकारान्तः, स्त्रीलिङ्गः (कदुम्बरी) अजन्तः
६०३८ मलयज अकारान्तः, पुंलिङ्गः (चन्दनः) अजन्तः
६०३९ मलिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (रजस्वला) अजन्तः
६०४० मलिम्लुच अकारान्तः, पुंलिङ्गः (चोरः) अजन्तः
६०४१ मल्लिका आकारान्तः, स्त्रीलिङ्गः, आबन्तः (तृणशून्यम्, कश्चन वृक्षविशेषः) अजन्तः
६०४२ मल्लिकाक्ष अकारान्तः, पुंलिङ्गः (हंसभेदः) अजन्तः
६०४३ मल्लिगन्धि इकारान्तः, नपुंसकलिङ्गः, घिसंज्ञकः (मङ्गल्या) अजन्तः
६०४४ मसूर अकारान्तः, पुंलिङ्गः (मसूरः) अजन्तः
६०४५ मसूरविदला आकारान्तः, स्त्रीलिङ्गः, आबन्तः (श्यामत्रिधारा) अजन्तः

६०४६ मस्कर अकारान्तः, पुंलिङ्गः (वेणुः) अजन्तः
६०४७ मस्करिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (संन्यासी) हलन्तः
६०४८ मस्तक अकारान्तः, पुंलिङ्गः (शिरः) अजन्तः
६०४९ मस्तक अकारान्तः, नपुंसकलिङ्गः (शिरः) अजन्तः
६०५० मस्तिष्क अकारान्तः, नपुंसकलिङ्गः (मस्तकभवस्नेहः) अजन्तः
६०५१ मस्तु उकारान्तः, नपुंसकलिङ्गः, घिसंज्ञकः (वस्त्रनिःसृतदधिजलम्) अजन्तः
६०५२ मह अकारान्तः, पुंलिङ्गः (उत्सवः) अजन्तः
६०५३ महती ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (वीणाभेदः) अजन्तः
६०५४ महत् तकारान्तः, पुंलिङ्गः, उगित् (राज्यम्, विस्तृतम्, विशालम्) हलन्तः
६०५५ महत् तकारान्तः, नपुंसकलिङ्गः, उगित् (राज्यम्) हलन्तः
६०५६ महस् सकारान्तः, नपुंसकलिङ्गः, असन्तः (उत्सवः, प्रभा) हलन्तः
६०५७ महाकन्द अकारान्तः, पुंलिङ्गः (लशुनम्) अजन्तः
६०५८ महाकुल अकारान्तः, पुंलिङ्गः (कुलीनः) अजन्तः
६०५९ महाङ्ग अकारान्तः, पुंलिङ्गः (उष्ट्रः) अजन्तः
६०६० महाजालिन् नकारान्तः, स्त्रीलिङ्गः, इन्नन्तः (पीतघोषवल्ली) हलन्तः
६०६१ महादेव अकारान्तः, पुंलिङ्गः (शिवः) अजन्तः
६०६२ महाधन अकारान्तः, नपुंसकलिङ्गः (बहुमूल्यवस्तु) अजन्तः
६०६३ महानट अकारान्तः, पुंलिङ्गः (शिवः) अजन्तः
६०६४ महानस अकारान्तः, नपुंसकलिङ्गः (पाकस्थानम्) अजन्तः
६०६५ महापद्म अकारान्तः, पुंलिङ्गः (विशेषनिधिः) अजन्तः
६०६६ महाबिल अकारान्तः, नपुंसकलिङ्गः (आकाशः) अजन्तः
६०६७ महामात्र अकारान्तः, पुंलिङ्गः (प्रधानोद्योगस्थाः) अजन्तः
६०६८ महारजत अकारान्तः, नपुंसकलिङ्गः (सुवर्णम्) अजन्तः
६०६९ महारजन अकारान्तः, नपुंसकलिङ्गः (कुसुम्भम्) अजन्तः
६०७० महारण्य अकारान्तः, नपुंसकलिङ्गः (महावनम्) अजन्तः
६०७१ महाराजिक अकारान्तः, पुंलिङ्गः, नित्यबहुवचनान्तः (गणदेवता) अजन्तः
६०७२ महारौरव अकारान्तः, पुंलिङ्गः (नरकभेदः) अजन्तः
६०७३ महावात अकारान्तः, पुंलिङ्गः (महावायुः) अजन्तः
६०७४ महाशूद्री ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (आभीरी) अजन्तः
६०७५ महाश्वेता आकारान्तः, स्त्रीलिङ्गः, आबन्तः (शुक्लभूकुश्माण्डः) अजन्तः
६०७६ महासहा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (माषपर्णी) अजन्तः
६०७७ महासेन अकारान्तः, पुंलिङ्गः (कार्तिकेयः) अजन्तः
६०७८ महिमन् नकारान्तः, पुंलिङ्गः, अन्नन्तः (सिद्धिः) हलन्तः
६०७९ महिला आकारान्तः, स्त्रीलिङ्गः, आबन्तः (स्त्री) अजन्तः
६०८० महिलाह्वया आकारान्तः, स्त्रीलिङ्गः, आबन्तः (प्रियङ्गुवृक्षः) अजन्तः
६०८१ महिष अकारान्तः, पुंलिङ्गः (महिषः) अजन्तः
६०८२ महिषी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (पट्टमहिषी) अजन्तः
६०८३ मही ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (भूमिः) अजन्तः
६०८४ महीक्षित् तकारान्तः, पुंलिङ्गः (राजा) हलन्तः
६०८५ महीध्र अकारान्तः, पुंलिङ्गः (पर्वतः) अजन्तः
६०८६ महीभुज् जकारान्तः, पुंलिङ्गः (भूपालः, राजा) हलन्तः
६०८७ महीयस् सकारान्तः, पुंलिङ्गः, असन्तः, उगित् (अतिशयेन महान्) हलन्तः
६०८८ महीरुह अकारान्तः, पुंलिङ्गः (वृक्षः) अजन्तः
६०८९ महीलता आकारान्तः, स्त्रीलिङ्गः, आबन्तः (केचुवा इति जन्तुविशेषः) अजन्तः
६०९० महीसुत अकारान्तः, पुंलिङ्गः (मङ्गलः) अजन्तः
६०९१ महीसूनु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (दक्षिणदिशायाः ग्रहः) अजन्तः
६०९२ महेरणा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (सल्लकी) अजन्तः
६०९३ महेश्वर अकारान्तः, पुंलिङ्गः (शिवः) अजन्तः
६०९४ महोक्ष अकारान्तः, पुंलिङ्गः (महावृषभः) अजन्तः
६०९५ महोत्पल अकारान्तः, नपुंसकलिङ्गः (पद्मम्) अजन्तः
६०९६ महौषध अकारान्तः, नपुंसकलिङ्गः (अतिविषा, लशुनम्, शुण्ठी) अजन्तः
६०९७ मा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (लक्ष्मी) अजन्तः
६०९८ माक्षिक अकारान्तः, नपुंसकलिङ्गः (पुष्पमधुः) अजन्तः
६०९९ मागध अकारान्तः, पुंलिङ्गः (वंशपरम्पराशंसकाः, क्षत्रियाद्वैश्याभ्यामुत्पन्नः) अजन्तः
६१०० मागधी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (यूथिका, पिप्पली) अजन्तः
६१०१ माघ अकारान्तः, पुंलिङ्गः (माघमासः) अजन्तः
६१०२ माठर अकारान्तः, पुंलिङ्गः (सूर्यपार्श्वस्थः) अजन्तः
६१०३ माणवक अकारान्तः, पुंलिङ्गः (बालः, दशलतिकाहारः) अजन्तः
६१०४ माणव्य अकारान्तः, नपुंसकलिङ्गः (माणवानां समूहः) अजन्तः

६१०५ माणिमन्थ अकारान्तः, नपुंसकलिङ्गः (सिन्धुजलवणम्) अजन्तः
६१०६ मातङ्ग अकारान्तः, पुंलिङ्गः (चण्डालः) अजन्तः
६१०७ मातरिश्वन् नकारान्तः, पुंलिङ्गः, अन्नन्तः, संयोगपूर्ववन्नन्तः (वायुः) हलन्तः
६१०८ मातलि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (इन्द्रसारथिः) अजन्तः
६१०९ मातामह अकारान्तः, पुंलिङ्गः (मातुः पिता) अजन्तः
६११० मातुल अकारान्तः, पुंलिङ्गः (धत्तूरः, मातुर्भ्राता) अजन्तः
६१११ मातुलपुत्रक अकारान्तः, पुंलिङ्गः (धत्तूरफलम्) अजन्तः
६११२ मातुलानी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (मातुलभार्या, चणभेदः) अजन्तः
६११३ मातुलाहि इकारान्तः, पुंलिङ्गः, घिसंज्ञकः (चित्रसर्पः) अजन्तः
६११४ मातुली ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (मातुलभार्या) अजन्तः
६११५ मातुलुङ्गक अकारान्तः, पुंलिङ्गः (मातुलिङ्गकः) अजन्तः
६११६ मातृ ऋकारान्तः, स्त्रीलिङ्गः (माता, जननी, गौः) अजन्तः
६११७ मातृष्वसृ ऋकारान्तः, स्त्रीलिङ्गः (मातृष्वसुः सुतः) अजन्तः
६११८ मात्र अकारान्तः, नपुंसकलिङ्गः (कार्त्स्न्यम्, अवधारणम्) अजन्तः
६११९ मात्रा आकारान्तः, स्त्रीलिङ्गः, आबन्तः (सूक्ष्मम्, अल्पम्, परिमाणः, परिवारः) अजन्तः
६१२० माद अकारान्तः, पुंलिङ्गः (आनन्दः) अजन्तः
६१२१ मादृश् शकारान्तः, पुंलिङ्गः, क्विन्नन्तः (अहम् इव दृश्यते सः) हलन्तः
६१२२ माधव अकारान्तः, पुंलिङ्गः (विष्णुः, वैशाखमासः) अजन्तः
६१२३ माधवक अकारान्तः, पुंलिङ्गः (मधुकपुष्पकृतमद्यम्) अजन्तः
६१२४ माधवी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (कुन्दभेदः) अजन्तः
६१२५ माध्य अकारान्तः, पुंलिङ्गः (कुन्दम्) अजन्तः
६१२६ माध्य अकारान्तः, नपुंसकलिङ्गः (कुन्दम्) अजन्तः
६१२७ मान अकारान्तः, पुंलिङ्गः (अभिमानः) अजन्तः
६१२८ मानव अकारान्तः, पुंलिङ्गः (मनुष्यः) अजन्तः
६१२९ मानस् अकारान्तः, नपुंसकलिङ्गः (मनस्) अजन्तः
६१३० मानसौकस् सकारान्तः, पुंलिङ्गः, असन्तः (हंसः) हलन्तः
६१३१ मानिनी ईकारान्तः, स्त्रीलिङ्गः, नदीसंज्ञकः, ङ्यन्तः (स्त्रीविशेषः) अजन्तः
६१३२ मानिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः (मन्यते सः, विशिष्टप्रकारेण चिन्तयति सः) हलन्तः
६१३३ मानुष अकारान्तः, पुंलिङ्गः (मनुष्यः) अजन्तः
६१३४ मानुष्यक अकारान्तः, नपुंसकलिङ्गः (माणवानां समूहः) अजन्तः
६१३५ माया आकारान्तः, स्त्रीलिङ्गः, आबन्तः (इन्द्रजालादिमाया) अजन्तः
६१३६ मायाकार अकारान्तः, पुंलिङ्गः (इन्द्रजालिकः) अजन्तः
६१३७ मायादेवीसुत अकारान्तः, पुंलिङ्गः (शाक्यः) अजन्तः
६१३८ मायु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः (पित्तम्) अजन्तः
६१३९ मायूर अकारान्तः, नपुंसकलिङ्गः (मयूरगणः) अजन्तः
६१४० मार अकारान्तः, पुंलिङ्गः (कामदेवः) अजन्तः
६१४१ मारजित् तकारान्तः, पुंलिङ्गः (बुद्धः) हलन्तः
६१४२ मारण अकारान्तः, नपुंसकलिङ्गः (मारणम्) अजन्तः
६१४३ मारिष अकारान्तः, पुंलिङ्गः (मान्यः) अजन्तः
६१४४ मारुत अकारान्तः, पुंलिङ्गः (वायुः) अजन्तः
६१४५ मार्कव अकारान्तः, पुंलिङ्गः (भृङ्गराजः) अजन्तः
६१४६ मार्ग अकारान्तः, पुंलिङ्गः (मार्गशीर्षमासः, मार्गः) अजन्तः
६१४७ मार्गण अकारान्तः, नपुंसकलिङ्गः (अन्वेषणम्) अजन्तः
६१४८ मार्गण अकारान्तः, पुंलिङ्गः (बाणः) अजन्तः
६१४९ मार्गशीर्ष अकारान्तः, पुंलिङ्गः (मार्गशीर्षमासः) अजन्तः
६१५० मार्जन अकारान्तः, पुंलिङ्गः (श्वेतलोध्रः) अजन्तः
६१५१ मार्जना आकारान्तः, स्त्रीलिङ्गः, आबन्तः (प्रोञ्छनादिनाङ्गनिर्मलीकरणम्) अजन्तः
६१५२ मार्जार अकारान्तः, पुंलिङ्गः (मार्जारः) अजन्तः
६१५३ मार्जिता आकारान्तः, स्त्रीलिङ्गः, आबन्तः (दधिमधुशर्करामरिचार्द्रादिभिः कृतलेह्यः) अजन्तः
६१५४ मार्तण्ड अकारान्तः, पुंलिङ्गः (सूर्यः) अजन्तः
